नियोजितः -ता -तं, समर्पितः -ता -तं, दापितः -ता -तं, व्यवस्थापितः -ता -तं, प्रकल्पितः -ता -तं, आरोपितः -ता -तं.

ASSIGNEE, *s.* नियोगी *m.* (न्), कार्य्येषु नियुक्तः, प्रतिनिधिः, प्रतिपुरुषः.

ASSIGNMENT, *s.* (Of goods) निबन्धनं, समर्पणं.—(Appointment) नियोजनं.

*To* ASSIMILATE, *v. a.* (To bring to a likeness) समीकृ, तुल्यीकृ.—(To perform the act of converting food to nourishment) जीर्णिपूर्व्वकं समीकृ, परिणामं कृ.

ASSIMILATION, *s.* (The act of) समीकरणं, तुल्यीकरणं.—(The state of) समता, समानता, तुल्यता, साम्यं.—(Of food) परिणामः, परिणतत्वं, विपाकः, परिपक्वता.—(Of fractions) भागजातिः *f.*

*To* ASSIMULATE, *v. a.* छल् (nom. छलयति -यितुं), छद्म or कपटं कृ.

ASSIMULATION, *s.* छलनं, कपटः -टं, छद्म *n.* (न्).

*To* ASSIST, *v. a.* उपकृ (c. 8. -करोति -कर्त्तुं), उपचर् (c. 1. -चरति -चरितुं), उपग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), अभिरक्ष् (c. 1. -रक्षति -रक्षितुं), उपकारं कृ, साहाय्यं कृ, पक्षपातं कृ.

ASSISTANCE, *s.* उपकारः, उपकारिता, उपकृतं, साहाय्यं, साहितं, उपग्रहः, अनुग्रहः, पक्षपातः.

ASSISTANT, *s.* उपकारी *m.* (न्), उपकारकः, साहाय्यकर्त्ता *m.* (र्तृ), सहायः, उत्तरसाधकः.

ASSISTED, *p. p.* उपकृतः -ता -तं, कृतोपकारः -रा -रं, उपचरितः -ता -तं.

ASSIZE, *s.* (A court of justice) दोषादोषविचारसभा, दण्डयोगसभा, दण्डप्रणयनसभा.—(Market rate, measure) आपणिकः, अर्घबलाबलं, परिमाणं, मानं.

*To* ASSIZE, *v. a.* (To fix the rate of any thing) अर्घं संख्या in caus. (-ख्यापयति -यितुं), अर्घबलाबलं or द्रव्यादिमूल्यं or परिमाणं निरूप् (c. 10. -रूपयति -यितुं), or स्था in caus. (स्थापयति -यितुं).

ASSIZER, *s.* अर्घसंख्यापकः, मूल्यनिरूपकः, विक्रेयद्रव्यादिपरिमाणनिरूपकः.

ASSOCIATE, *s.* (A partner, confederate) सहायः, सङ्गी *m.* (न्), अनुषङ्गी *m.* (न्), उत्सङ्गी *m.* (न्), सहकारी *m.* (न्), सजूः *m.* (-जुस्), सहवासी *m.* (न्).—(A companion, equal) वयस्यः.

*To* ASSOCIATE, *v. a.* संयुज् (c. 7. -युनक्ति -योक्तुं, c. 10. -योजयति -यितुं), सङ्गम् in caus. (-गमयति -यितुं), सम्बन्ध् in caus. (-बन्धयति -यितुं), संश्लिष् in caus. (-श्लेषयति -यितुं).

*To* ASSOCIATE WITH, *v. n.* संवस् (c. 1. -वसति -वस्तुं), सह वस्; सहितः -ता -तं भू, मिल् (c. 6. मिलति -ते, मेलितुं), सम्मिल्; सह गम् (c. 1. गच्छति, गन्तुं), सहवासं कृ.—(Not to be associated with) अपाङ्क्तेयः -या -यं.

ASSOCIATED, *p. p.* संयुक्तः -क्ता -क्तं, संश्लिष्टः -ष्टा -ष्टं, संहतः -ता -तं, सहितः, -ता -तं, सहगतः -ता -तं, सङ्घातवान् -वती -वत् (त्), उत्सङ्गितः -ता -तं.

ASSOCIATION, *s.* संयोगः, साहित्यं, साहाय्यं, सार्द्धं, सङ्गमः, सङ्गतिः *f.*, संसर्गः, सहायता or -त्वं, साहचर्य्यं, समागमः, सङ्घातः, आसङ्गः, सङ्गः, संश्लेषः.—(Evil association) असत्संसर्गः.—(Set, club) पङ्क्तिः *f.*—(Partnership) समांशिता.

*To* ASSORT, *v. a.* यथाक्रमं or क्रमेण स्था in caus. (स्थापयति -यितुं), विधा (c. 3. -दधाति -धातुं), संविधा; रच् (c. 10. रचयति -यितुं), विरच्; ग्रन्थ् (c. 1. ग्रन्थति, c. 9. ग्रथ्नाति, ग्रन्थितुं), पृथक् पृथक् स्था in caus. or कृ.

ASSORTED, *p. p.* विरचितः -ता -तं, व्यूढः -ढा -ढं, विन्यस्तः -स्ता -स्तं.

ASSORTMENT, *s.* विरचनं, पृथक्करणं, विन्यासः, प्रतिविधानं, ग्रन्थनं -ना, व्यूहनं, व्यूढिः *f.*, परिपाटिः *f.*—(A mass of things assorted) सञ्चयः, सङ्घातः, वृन्दं, ओघः.

*To* ASSUAGE, *v. a.* शम् in caus. (शमयति -यितुं), उपशम्, प्रशम्; सान्त्व् or शान्त्व् (c. 10. सान्त्वयति -यितुं), अभिशान्त्व्, परिशान्त्व्; तुष् in caus. (तोषयति -यितुं), परितुष्.

*To* ASSUAGE, *v. n.* शम् (c. 4. शाम्यति, शमितुं), उपशम्, प्रशम्; तुष् (c. 4. तुष्यति, तोष्टुं).

ASSUAGED, *p. p.* शान्तः -न्ता -न्तं, प्रशमितः -ता -तं, प्रशान्तः -न्ता -न्तं.

ASSUAGEMENT, *s.* प्रशमनं, शान्तिः *f.*, उपशान्तिः *f.*, सान्त्वनं.

ASSUASIVE, *a.* शान्तिकः -की -कं, शमकः -का -कं, शान्तिदः -दा -दं.

*To* ASSUME, *v. a.* (To take) ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), परिग्रह् प्रतिग्रह्; लभ् (c. 1. लभते, लब्धुं).—(To arrogate) अधर्म्मतस् or मिथ्या ग्रह् or आत्मसात्कृ, परधर्म्मं ग्रह्; 'he assumes the king,' राजायते.—(To suppose something granted) अप्रमाणीकृत्य or अप्रमाणतस् or निष्प्रमाणेन वद् (c. 1. वदति, वदितुं), अनुमतं -तां -तं ज्ञा (c. 9. जानाति, ज्ञातुं).

ASSUMED, *p. p.* गृहीतः -ता -तं, आदत्तः -त्ता -त्तं.—(Not natural) कृतकः -का -कं.

ASSUMPTION, *s.* (The act of taking) ग्रहणं, आदानं, प्रतिग्रहः, परिग्रहः, आत्मसात्करणं; 'false assumption,' मिथ्याग्रहणं.—(The supposition of any thing granted) निष्प्रमाणेन or अप्रमाणतस् ग्रहणं, प्रमाणव्यतिरेकेण कस्यचित् मतस्य धारणं; 'on the assumption, न्यायात्.—(The thing supposed) प्रतिज्ञा, प्रमेयं, उपन्यासः.—(Of a disguise) वेशधारणं, विडम्बनं.

ASSURANCE, *s.* (Certain expectation) विश्वासः, प्रत्ययः, प्रत्याशा, निश्चयः, दृढः प्रत्ययः.—(Want of modesty) धार्ष्ट्यं, प्रगल्भता, साहसं, निर्लज्जता.—(Reason for confidence) विश्वासकारणं, प्रत्ययहेतुः.—(Insurance, assurance of safety) योगक्षेमः, अभयवाक् *f.* (च्), सहाय्यत्वं.

*To* ASSURE, *v. a.* स्थिराकृ, दृढीकृ, संस्तम्भ् (c. 5. -स्तभ्नोति, c. 9. -स्तभ्नाति, -स्तम्भितुं, or caus. -स्तम्भयति -यितुं), विश्वासं दा, प्रमाणं दा, असन्दिग्धं -ग्धां -ग्धं कृ, सुनिश्चितं -तां -तं कृ.—(To affirm) दार्ढ्येन वद् (c. 1. वदति).

ASSURED, *p. p.* (Certain) स्थिरः -रा -रं, दृढः -ढा -ढं, सुनिश्चितः -ता -तं, असन्दिग्धः -ग्धा -ग्धं, असंशयः -या -यं.

ASSUREDLY, *adv.* निश्चितं, सुनिश्चितं, असंशयं, निःसन्देहेन, नूनं, एवं, खलु, किल, सुतरां.

ASTERISK, *s.* नक्षत्राकारश् चिह्नविशेषः.

ASTERISM, *s.* नक्षत्रं, ऋक्षः, तारा, तारकः, ज्योतिषी, दाक्षायिणी.

ASTERN, *adv.* नावः पश्चाद्भागं or पश्चिमभागं प्रति.

ASTHMA, *s.* दुःश्वासः, दुःश्वसनं, श्वासरोगः.

ASTHMATICAL, ASTHMATIC, *a.* दुःश्वासशीलः -ला -लं, श्वासरोगपीडितः -ता -तं.

*To* ASTONISH, *v. a.* विस्मि in caus. (-स्मापयति -ते -यितुं), व्याकुलीकृ, आकुलीकृ, चमत्कारं or विस्मयं जन् in caus. (जनयति -यितुं), चमत्कृ.

ASTONISHED, *p. p.* विस्मितः -ता -तं, विस्मयान्वितः -ता -तं, विस्मयाकुलः -ला -लं, चमत्कृतः -ता -तं, विलक्षः -क्षा -क्षं.—(To be astonished) विस्मि (c. 1. -स्मयते -स्मेतुं), आश्चर्य्यं ज्ञा (c. 9. जानाति, ज्ञातुं) or मन् (c. 4. मन्यते, मन्तुं).

ASTONISHING, *a.* आश्चर्य्यः -र्य्या -र्य्यं, अद्भुतः -ता -तं, विचित्रः -त्रा -त्रं.

ASTONISHMENT, *s.* विस्मयः, आश्चर्य्यत्वं, चमत्कारः, व्याकुलता.—(With astonishment) साश्चर्य्यं, सविस्मयं.—(Matter of astonishment) विस्मयहेतुः *m.*, विस्मयकारणं, अद्भुतं.

*To* ASTOUND *v. a.* मुह् in caus. (मोहयति -यितुं), व्यामुह्, व्याकुलीकृ, विस्मयाकुलं -लां -लं कृ.

ASTOUNDED, *p. p.* विस्मयाकुलः -ला -लं, मोहितः -ता -तं, आकुलीकृतः -ता -तं.